M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 547

Title: Varada Ganesh Sahasranama Stotra

547

वरदगणेशसहस्रनामस्तोत्र

Varada Ganesha Sahasra nama Stotra from Rudra Yamala

Title

Author

Editor

Year, Vols.

Publisher

Remarks

547

देवीजातोहं त्रिपुरांतकः ॥४॥ तथापि गणेशा
नं स्तौमि नामसहस्रकैः ॥ विघ्ना दुरं पलायंते काले
रुद्रादिकप्रजाः ॥५॥ तदेतव भक्त्याहं साधकानां
हिताय च ॥ महागणपतिं वंदे ह्येवं दिव्यं नामसहस्र
कं ॥६॥ अस्य श्रीवरदगणेशसहस्रनामस्तोत्रमं
त्रस्य भैरव ऋषिः गायत्री छंदः श्रीमहागणपतिर्दे
वता हुं बीजं ह्रीं शक्तिः कुरु कुरु किलकं श्रीमहाग
णपतिप्रीत्यर्थे जपे विनियोगः ॥ ॥ ॐ श्री ह्रीं क्रौं ग

णाध्यक्षो गूढो गंगणपतिर्गुरुः॥ गुणाढ्यो निर्गुणो
गोप्ता गजध्वजो विभावसुः॥१॥ विश्वेश्वरो विभा दीप्तो
दीपनो धीवरो निधिः॥ सहाशांतो जगत्त्राता विश्व
क्सेनो विभाकरः॥२॥ विजयो विजयी वेद्यो वारां
निधिरनुत्तमः॥ अणिमा विभवी श्रेष्ठो ज्येष्ठो गा
था प्रियो गुरुः॥३॥ सृष्टिकर्ता जगद्धर्ता विश्वभर्ता
जगत्पतिः॥ पतिः पीतविभूषांको रक्ताक्षो लोहि
तांबरः॥४॥ विरूपाक्षो विमानस्थो विनयः सने २

यः सुखी॥ सुरूपः सात्त्विकः शुद्धः सत्यः शंकरनं
दनः॥५॥ नंदीश्वरो महानंदी बंदिस्तुत्यो विचक्ष
णः॥ दैत्यमर्दी मदक्षीबो मदिरारुणलोचनः॥६॥
स्वरात्मा विश्वसारी च विश्वचारी विलोचनः॥ परं
ब्रह्म परं ज्योतिः साक्षी त्र्यक्षो विकत्थनः॥७॥ विश्वेश्व
रो वीररक्तो सौभाग्यो भाग्यवर्धनः॥ भृंगीरिटिर्नं
शमात्मी भृंगकूजितनादितः॥८॥ विनर्तनो वि
नेतापि विनेता नंदनार्चितः॥ वैनतेयो विनम्रांग

गो विश्वनायकनायकः ॥ ९ ॥ विराटकोविराटश्च
विदग्धो विधिरात्मभूः ॥ पुष्पदंतः पुष्पहारी पु
ष्पमाला विभूषणः ॥ १० ॥ पुष्पेषु मथनः पुष्पा वि
कर्त्ता कर्त्तरी करः ॥ अनंतकचीतगणश्चिंतचिं
तापहारकः ॥ ११ ॥ अचंत्यो चिंत्यरूपश्च वेद
नाकुलमंडनः ॥ लोहितो लोपिता लिङ्गो लोहि
ताक्षो विलोकनः ॥ १२ ॥ लुब्धाशयो लोभरतो
लोभहा लंघ्यगात्रगः ॥ सुंदरः सुंदरीपुत्रः स

मस्ता सुरघातकः ॥ नूपुराढ्यो विभवदो नर
नारायणो रविः ॥ १३ ॥ विचारवान् स्तुतो वाग्मी वि
चारि विजयेश्वरः ॥ सुहो बुधः सदारूपः सु
खदः सुखसेवितः ॥ १४ ॥ विकृत्यनो विपच्चारी
विनरो नरनर्तकः ॥ नरो नाट्यप्रियो नाद नंतो
नंतगुणात्मकः ॥ १५ ॥ विश्वसूर्विश्वधाता च
विनतास्यो विनर्तकः ॥ करालः कामदः कांतः
कमनीयः कलाधरः ॥ १६ ॥ कारूण्यरूपः कुटिलः

कुलाचारी कुलेश्वरः॥ विकरालो रणश्रेष्ठः
संहारो हारभूषणः॥७ स्तरुरम्य मुखोरलो
रेवतीरमणोरसः॥ महाकालो महादंष्ट्रो म
होरगविभूषणः॥१८॥ उन्नतरूपः कालाग्नि
रग्निसूर्येन्दुलोचनः॥ सितास्यः सितमाल्यश्च
सितदंतः सितांशुमान्॥१९॥ असितात्मा भै ६
रवेशो भागवान् भगवान् भवः॥ भर्गात्मजो

भगावासो भगदो भाग्यवर्द्धनः॥२०॥ शं
करः शुचिः शौतो श्रेष्ठ श्रव्यः शचीपतिः॥
वेदाद्यो वेदकर्त्ता च वेदवेद्यः सनातनः॥२१॥
विद्याप्रदो वेदरतो वैदिको वेदपारगः॥ वेद
श्चनिरतो विप्रो वेदागमविचारवित्॥२२॥ स
र्वज्ञः सर्वगः साधुः सद्यः सदसन्मयः॥ नि
रामयो निराकारो निर्मयो नित्यरूपधृक्॥२३॥

निर्वैरो वैरिविध्वंसी मत्तवारणसन्निभः ॥ शि
वंकरः शिवसुतः शिवानंदविवर्धनः ॥ २४ ॥ शै
त्यश्वेतश्रुतिमुखो मुग्धामोदकभोजनः ॥ दे
वदेवोरिनकरो धृतिमान् द्युतिमान् धवः ॥ २५ ॥
शुद्धात्मा शुद्धमतिमान् शुद्धदीप्तश्शुचि ५
व्रतः ॥ शरण्यः शौनकः शूरः शारदंभोजद
पकः ॥ २६ ॥ दारकः शशिरत्युग्रः शितशंकर

पूजितः ॥ शंकरो निर्भवो नित्यो भयप्रोद्धत्रासप
तत्परः ॥ २७ ॥ लीलोलीलारसोद्धत्रासी विलासी
विभ्रमो भ्रमः ॥ भ्रमणः शशिभृत्सूर्यः शनि
र्धरणिनंदनः ॥ २८ ॥ बुद्धो विबुधसेव्यश्च बु
धराजो बलंधरः ॥ जीवोजीवप्रदो जैत्रस्तुत्यो
नित्यो नतिप्रियः ॥ २९ ॥ जनको जिनमार्ग
ज्ञो जैनमार्गविनर्तकः ॥ गौरिसुतो गुरु

चरो गोरो गोगणपूजितः ॥३०॥ परं पदं प
रं धाम परमात्मा कविः कुजः ॥ राहुर्हेत्वधि
रष्टृषीकेशः कनककुंडलः ॥३१॥ ग्रहेशो ग्राहि
तो ग्राह्यो मलिर्बुबुनादितः ॥ पर्जन्यः पावनः २४
पोत्री पीनवक्षोपराजितः ॥३२॥ वनेचरो वन ६
पतिर्वनवासी स्मरोयमः ॥ पुण्यं हूतः पवि
त्रं च परात्मा पुण्यविग्रहः ॥३३॥ पूर्णेंदुसक

लाकारो मारः पूर्णमनोरथः ॥ योगात्मा
योगभृच्छज्वा याज्ञिको यज्ञवत्सलः ॥३४॥
यशस्वी यज्ञमानेष्टो वज्रभृद्वज्रपंजरः ॥
मल्लिभद्रो मलिमयो मान्या मीनध्वजा
श्रयः ॥३५॥ मीनध्वजो मनोहारी योगि
नां योगवर्द्धनः ॥ दृष्टास्रष्टा तपस्वी च वि
रक्तीतापसप्रियः ॥३६॥ तपोमयस्तपा

मूर्त्तिस्तपनश्चतपोधनः॥ रूचकोमेच
कोरूपस्तुरूपस्तोमरधातकः॥३१॥ दंडीवे
डांमुरव्याक्तः कमंडलुधरोनघः॥ ॥कामी
कर्मरतः कालः कैलासकृतसद्विकृतरः॥
३२॥ भालकोजनपूज्यहेंश्वआजन्त
ज्ञसूदनः॥ आलंधरोजगध्वंसीला
स्पलक्षवनोहविः॥३३॥ हविष्मान्रुप्ये

लाह्वीलाटकोलाटकांगदः॥ सुमेरुर्हिम
वान्कोताहरपुत्रोहलंकषः॥४०॥ हेला
प्रियोहृदिस्थश्चकांताहृदयभूषणः॥ पो
षणः केशहाश्रूरः कठोरः कठिलारु
तिः॥४१॥ कुबेरोधीमयोधाताध्येयो
धीमान्दयानिधिः॥ देवीशादमनो
हरयोदाताज्ञातासितः समः॥४२॥ निर्ग

तोनैगमीगम्योनिर्ईरोईरिलोईरः॥
ईनजीवोजितारातिर्ईगव्यापीईगगन्
मयः॥४३॥ चामीकरनिभोनाद्धोनलि
नायतलोचनः॥ रोचनोमोचनोमंत्रीमं
त्रकोटिसमाश्रयः॥४४॥ पंचभूतात्म
कः पंचसायकः पंचवक्त्रकः॥ पंचमः प
श्चिमः पूर्लः पूर्वः किलीलकः कुलिः॥४५॥

कठोरहृदयो ग्रीवालंकृतोललिताश
॥लोलचित्तोबृहल्लासोमासपहर्त्तृकृ
पवान्॥४६॥ ध्रुवोध्रुवगतिर्धर्म्योधर्मना
दप्रियोनलः॥ ॥=सगस्सो ग्रस्तभुवनोभु
वनैकमलापहः॥४७॥ सागरः स्वर्गति
स्वच्छः सानंदः साधुपूजितः॥ सती
पतिः समरसः सनकः सरलः सुरः॥४८॥

सुरप्रियो वसुपतिर्वासवो वंशपूजितः ॥ चित्र
शेषि त्तनाथश्च धनिनो धनदायकः ॥ ४९ ॥
राजाराजीवनयनस्मृतिदः स्मृतिनां वरः ॥
त्रयम्बिनो श्विमुखो: शुभ्रो भरणो भरणीप्रि
यः ॥ ५० ॥ कृत्तिकासनकः कोलो रोहिणी ह
लपादुकः ॥ रिभरेणरिमध्यः वरोहिणी मा २
हनामतः ॥ ५१ ॥ मृगराजो मृगशिरा माधवो
मधुरध्वनिः ॥ आर्द्रीकरो महाबुद्धिर्महार

ग विभूषणः ॥ ५२ ॥ महेपदस्तल्लस्तीके महक
रालः पुनर्नयः ॥ पुनर्देवः पुनर्जेता पुनर्जी
वः पुनर्वसुः ॥ ५३ ॥ तित्तिरस्त्रिमिकेतुश्च ति
त्तिचारकघातकः ॥ तिष्यस्तुष्यधरोऽश्लेषा वि
श्लेषः श्लेष एकराट् ॥ ५४ ॥ मानवो माधवो मा
घो वाचालो माधवोऽन्नमः ॥ मेघो मेघप्रियो मा
घो महामुजो महायुजः ॥ ५५ ॥ पूर्वाफाल्गुनि

कः स्फीतफल्गुरोत्तरफाल्गुनिः ॥ फेलिनोब्र
ह्लहोभ्रस्तासंसत्तंतुसमाश्रयः ॥ घोरलस्त
श्चतुहस्तोहस्तिवक्त्रोहस्तायुधः ॥ ५८ ॥ चि
त्रांबरोचित्रतपहोस्वस्तिदःस्वस्तिविग्र
हः ॥ विशाखाशिखिसख्यश्वशिखिध्वज
सहोदरः ॥ ५९ ॥ अनुरेणुकरणःफाल्गुरो १०
रुरुरेणुसुतोनरः ॥ अनुराधाप्रियोराधा

श्रीमानुग्रकुशाचीपतिः ॥ ५८ ॥ शुचिःपूर्वःस्त
थाषाढाश्चोत्तराषाढएवच ॥ ५९ ॥ श्रावण
श्रवणश्रोताधनिर्धन्योधनिष्ठिकः ॥ शा
ततपःशातकुंभःशातंज्योतिःशतंभिषक् ॥
६० ॥ पूर्वाभाद्रपदोभाद्रउत्तराभाद्रएवच ॥
रेणुकातनयोरामोरेवतीरमलोरसिः ॥ ६१ ॥
राश्यहोभिषगात्मीयोनारेशस्तारकद्युतिः ॥
अतीतःप्रोद्धितःप्रोतःपारगःपरमोहितः ॥ ६२ ॥

परहा परहरूपं च वायुपूज्यः परंमहः ॥ पुराण
निगमो वेद्यो महिषो राहुसो ग्रहः ॥ ५३ ॥ ग्र
हो मेषो वृषो मंदो मन्मथो मिथुनार्चितः ॥
कल्पवृक्षकुलकुरो हीनो मर्कटः कर्कटो घृणिः
॥ ५४ ॥ कुंकुरो वन ओ हंसः परहंसः खगा
लकः ॥ सिंहः सिंहासनो भूषा मोही मुख ११
क वाहनः ॥ ५५ ॥ पुत्रदो नरकत्राता कामः श्री

तः कुलोद्भवतः ॥ अतुल्यरूपो बलवान् अतुल्य
तनुल्यनायकः ॥ ५६ ॥ अलिश्वापध्वरोध
न्वी कच्छपो मकरो मणिः ॥ कुंभ भट्टकेलशो
कुञ्जो मीन मांसस्तु तर्पितः ॥ ५७ ॥ राशिता
राग्रहयमस्थितिः स्थिरूपो जगत्प्रभुः ॥ प्रता
पी प्रतपत्रयो द्वितीयो द्वैतानिश्चितः ॥ ५८ ॥
त्रिरूपश्च तृतीयात्रिस्त्रयी रूप रूत्रयीतनुः ॥

चतुर्थीवक्त्रभोदेवो पारगः पंचमीश्वरः॥९॥
षडूसस्वादको ज्ञाता षष्ठी षष्ठिकवत्सलः॥
सप्तार्णवगतिः सारः सप्तमीश्वर ईश्वरः॥
१०॥ अष्टमीनंदनो नंतो नवमी[illegible]भक्तिपू
जितः॥ दशाहिकातिपूज्यश्च दशमीकुहि १२
लोद्भुतः॥११॥ एकादशात्मा गणपो द्वादशी
युगवर्चितः॥ त्रयोदश मनुस्तुतः पूर्णिमा

नंदविग्रहः॥ दशा दर्शो दर्शनश्च वानप्रस्थो
मुनीश्वरः॥१३॥ मौनी मधुरवान्मूलमू
र्तिर्मान्मेघवाहनः॥ महागजो जितक्रोधो
जितशत्रुजयाश्रयः॥१४॥ रौद्रो रुद्रप्रियो
रुक्मो रुद्रपुत्रोघनाशनः॥ भवप्रियो भ
वानिलिंगभारभृन्भूतवाहनः॥१५॥ गोध
र्वः कुशलः कूरो वैकुंठो विष्णुसेवितः॥ वृत्र

हाविघ्नहासारः समस्तदुरितापहः ॥ मंडरोमा
डरोमत्तो दुर्गापुत्रो दुरालक्षः ॥ अनंतवसुधासा
रो वीरवीर्यैकवीर्यहः ॥ ११ ॥ नास्वानमुकुरमालिक्यकू
ऊल्किंकिलिजातकः ॥ शुंडाधारी सुंडचलत्कुंडली
मुंडमालिकः ॥ १२ ॥ पद्माहः पद्महस्तश्च पद्मनाभस
मर्चितः ॥ ऊडूतोनरदंताढ्यो मालाभूषणभूषितः ॥ ५
१३ ॥ नारदोरावणोलोलश्चवणः पुल्पकश्रवः ॥ बृहद
ध्वासनासाकल्योव्याससत्रैलोक्यमंडलः ॥ २० ॥ इलामंल

लसंभ्रांतेरडतानुग्रहजीविकः ॥ बृहत्कर्णी बली
भूतवायुजीवितदिकृतरः ॥ २१ ॥ बृहद्दासपरवाक्रांतशीव
ब्रं स्तांडभांडकः ॥ बृत्पादसमाक्रांतससपातालवेपितः ॥
चः ॥ बृहद्दुक्रस्ततात्पुग्ररणानंदरसालसः ॥ बृहद्धस्तसु
धाशेषयुधिनिर्डितदानवः ॥ २३ ॥ स्फुरत्त्रिंदूरवदनः स्फु
रत्तेजोग्निलोचनः ॥ उद्दीपितमणिस्फूर्डनूपुरध्वनिना
दितः ॥ २४ ॥ चलत्तोयप्रवाहाद्रिनदीडलकणाकरः ॥ भ्र
मत्कुंडरसंघातवंदितांघ्रिसरोरुहः ॥ २५ ॥ ब्रह्मास्युतम
हारूडपुरःसरसुरार्चितः ॥ अशेषशेषप्रभृतिव्यालजा

लोपसेवितः॥१६॥गर्जत्संचानननारावत्रासाकाशधरातलः।
हाहाहूहूकृतातुच्छस्वरविभ्रांतमानसः॥१७॥पंचाशद्वर्ण
बीजाढ्यमंत्रयंत्रितविग्रहः॥वेदांतशास्त्रपीयूषधारास्रा
वितभूतलः॥१८॥शंखध्वनिसमाक्रांतपातालादिनभ
स्तलः॥चिंतामणिमहामंत्रोबलरुस्तोबलिःकविः॥१९॥ लिः५
कृतत्रेतायुगोद्भासभासमानजगत्रयः॥द्वापारःपरलो
कैककर्मध्वांतसुधाकरः॥२०॥सुधाशुक्रवपुर्भासञ्जहलां १४
आदिकराहकः॥अकारादिहकारांतवर्णपंक्तिसमुज्व
लः॥२१॥अकाराकारश्रोद्गीततानवानिनादितः॥इ

कारांकारमंत्राढ्यमालाभ्रमणलालसः॥२२॥उकारो
कारश्रोद्गीतघोरनागोपवीतिकः॥ऋवर्णांकितरूकार
पद्मद्वयसमुज्वलः॥२३॥लुकारयुतलूकारशंखपूर्णदि
गंतरः॥एकारैकारगिरिजास्तनपानविचक्षणः॥२४॥ओ
औकारविश्वादिकृतसृष्टिक्रमालयः॥अंअवर्णावलीव्या
सपादादिशीर्षमंडलः॥२५॥कर्णतालकृताच्युत्थैर्वायुवीजि
तनिर्झरः॥खगेशध्वनिरक्तांककिरीटारुणपादुकः॥२६॥
गर्वीताशेषगंधर्वगानतत्परश्रोत्रकः॥घनवाहनवागीशपु

रःसरसुरार्चितः॥९७॥ऊर्ध्वकर्णमतधारो घशोभमानैकदंत
कः॥चंडकुंकुमशुंडालजितसुंदरविग्रहः॥९८॥छत्रचामर
रत्नाढ्यमुकुटालंकृताननः॥उरोबद्धमहानर्घमणिपंक्ति
विराजितः॥९९॥झंकारीमधुपव्रातगीतनादनिनादितः॥कृ
वर्णकृतसंहारदैत्यमुकुपूर्णमुकुरः॥१००॥ताम्रसिंदूरपूजा
ढ्यसल्लारपरकच्छविः॥यकारधनुपंक्तपाढ्यसंतोषितद्विज
व्रतः॥१०१॥दयामयकृतंभोजधृतत्रैलोक्यमंडलः॥धनदादि १५
महायक्षसंसेवितपदांबुजः॥१०२॥नमिताशेषदेवौघकिरीट

मणिरंजितः॥परस्वर्गापवर्गादिमार्गछेदनदक्षकः॥१०३॥फणि
चक्रसमाक्रांतगलमंडलमंडितः॥वक्रभ्रूयुगभीत्याव
संतर्जितसुरासुरः॥१०४॥भवानीहृदयानंदवर्द्धनैकनिशा
करः॥मदिराकलशस्फीतकरालैककरांबुजः॥१०५॥यक्षांत
रायसंभ्रांतसज्जीकृतधनुर्धरः॥रत्नाकरसुधाक्रांत
कांतिकीर्त्तिविवर्धनः॥१०६॥लंबोदरमहाभीमवपुषानिरो
तासुरः॥वरुणादिदिगीशानांरचितार्चनचर्चितः॥१०७॥शंक
रैकप्रियाप्रेमनयनानंदवर्द्धनः॥षोडशासरिताल्लापगी

तगानविचक्षणः ॥८॥ समस्तदुर्गतिसरिन्नाथोत्तारणको
डुपः ॥ हरादिब्रह्मस्तवैकुंठब्रह्मगीतादिपाठकः ॥९॥ समापू
रितहृत्पद्मसंरहितचराचरः ॥ तारांकमंत्रवर्णैकविग्रहो
ज्वलविग्रहः ॥१०॥ अकारादिक्षकारांतविद्याभूषितभूषणः
ॐ श्रीं विनायको ॐ ह्रूं विद्याध्यक्षो गणाधिपः ॥११॥ हेरं
बो मोदकाहारो वक्रतुंडो विधिस्मृतः ॥ वेदांतगीतविद्या १६
र्थिसिद्धमंत्रेषु दुर्धरः ॥१२॥ गणेशो वरदो देवो द्वादशाक्ष
रमंत्रितः ॥ सप्तकोटिमहामंत्रमंत्रिताशेषविग्रहः ॥१३॥

गांगेयो गणसेव्यश्च ॐ श्रीं द्वैमातुरः शिवः ॥ ॐ श्रीं ह्रीं क्लीं
गं देवो महागणपतिः प्रभुः ॥१४॥ इदं नामसहस्रं ते महाग
णपतेः स्मृतं ॥ गुह्यं गुह्यतमं श्रेष्ठं सर्वमंत्रेषु गोपितं ॥१५॥
सर्वमंत्रनिधिं दिव्यं सर्वविघ्नविनाशनं ॥ अष्टतारामयं रा
शिवर्णपंक्तिसमन्वितं ॥१६॥ सर्वविद्यामयं ब्रह्मलं साधनं
साधकप्रियं ॥ गणेशस्य च सर्वस्वं रहस्यं त्रिदिवौकसां ॥
॥१७॥ यथेप्सफलदं लोके मनोरथप्रपूरणं ॥ अष्टसिद्धि
मयं साध्यं साधकानां जयप्रदं ॥१८॥ विनार्चनं विनाहो

मंदिना न्यासंविना ऊपं ॥ अणिमाद्यष्टसिद्धीनां साधनं
स्मृतिमात्रतः ॥१९॥ चतुर्थ्यामष्टरात्रेतु पठन्मंत्री चतुष्प
थे ॥ लिखेन्मूर्जे महादेवी पुण्यं नामसहस्रकं ॥२०॥ धार
येत्तच्चतुर्थ्यां तु मध्याह्ने मूर्ध्नि वा भुजे ॥ योषिद्वामकरे
बध्वा पुरुषो दक्षिणे करे ॥२१॥ स्तंभयेदपि ब्रह्माणं मोहये
दपि शंकरं ॥ वशयेदपि त्रैलोक्यं मारयेच्चाखिलान् रिपू १
न् ॥२२॥ उच्चारयेच्च गीर्वाणान्स्थापयेच्च धनं ऊयं ॥ बंध्यापु
त्रान् लभेच्छीघ्रं निर्धनो धनमाप्नुयात् ॥२३॥ त्रिवारं यः

पठेद्रात्रौ गणेशस्य पुरः शिवे ॥ नामभक्तियुतो देवी
भुक्त्वा भोगान्यथेप्सितान् ॥२४॥ प्रत्यहं वरदं पश्येदूर्ण
ऊं वरदोत्तमं ॥ य एतत्पठते नाम्नां सहस्रं भक्तिपूर्वकं
॥२५॥ तस्य वित्तादिविभवो दारायुः संपदस्तथा ॥ रणे राज
भये द्यूते पठेन्नामसहस्रकं ॥२६॥ सर्वत्र जयमाप्नोति ग
णेशस्य प्रसादतः ॥ इतीदं पुण्यसर्वस्वं मंत्रनामसहस्र
कं ॥२७॥ महागणपतेर्गोप्यं गोपनीयं स्वयोनिवत् ॥ ॥ १८
इति रुद्रयामलतंत्रे महारहस्ये श्रीवरदगणेशसहस्रना
मस्तोत्रं संपूर्णं ॥ ॥श्रीगजाननार्पणमस्तु ॥ श्रीरस्तु ॥